# संस्कृतवार्ता:

दिनाङ्क : 24/07/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- भारत-यू. के. इत्येतौ देशौ ऐतिहासिके मुक्तव्यापारसमन्वये हस्ताक्षरं कृतवन्तौ; प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, समन्वयमिदं उभयराष्ट्रयोः संयुक्त-समृद्धेः मार्गम् प्रशस्तं करोतीति।
- विभिन्नेषु विषयेषु विपक्षस्य कोलाहलानन्तरं संसदः उभयसदने सम्पूर्णदिवसाय स्थगिते ।
- षडुत्तरद्विसहस्रतमवर्षस्य मुम्बै-रेल्-विस्फोट-प्रकरणस्य द्वादश-अभियुक्तानां दोषमुक्ततेति प्रकरणे बॉम्बे-उच्चन्यायालयस्य आदेशः सर्वोच्चन्यायालयेन स्थगितः।
- चीनदेशस्य सीमायां अमूर-प्रदेशे एकोनपञ्चाशज्जनैः सह रशियादेशस्य यात्रीविमानं पतितम्।
- क्रिकेट्-क्रीडायां, भारतं, मैञ्चेस्टर्-नगरे चतुर्थ-निकष-क्रीडायाः द्वितीये दिने षट्क्रीडकानां हानौ एकविंशत्यधिकत्रिशतमिति धावनाङ्कान् व्यरचयत्।

---

<u>प्रधानमन्त्री-ब्रिटेन</u>

भारत-ब्रिटेन देशौ अद्य ऐतिहासिक-पदक्षेपम् अनुसरन्तौ स्वतन्त्रव्यापारसन्धौ हस्ताक्षरं कृतवन्तौ। चेकर्स् इत्यत्र स्वकीयेन ब्रिटिश-समकक्षीयेण कीर-स्टार्मर इत्यनेन सह वार्ताहरसम्वादे प्रदत्ते वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत् अद्य भारत-ब्रिटेनदेशयोः द्विपाक्षिकसम्बन्धानाम् ऐतिहासिकः दिवसः अस्ति । सः प्रसन्नतां प्रकटितवान् यत् अनेकवर्षाणाम् परिश्रमस्य अनन्तरं द्वयोः राष्ट्रयोः मध्ये समग्र-आर्थिक-व्यापार-सन्धिः अभवत् । सः अवोचत् यत् एषा सन्धिः भारत-ब्रिटेन-देशयोः संयुक्त-समृद्धेः मार्गम् प्रशस्तं करोति । सः प्रोक्तवान् यत् भारतीयवस्त्राणि, पादत्राणानि, रत्न-आभूषणानि, समुद्रजातानि खाद्यानि,

अभियान्त्रिक-वस्तूनि च ब्रिटेनदेशे उत्तमविपणनावसरान् प्राप्स्यन्ति । सः अकथयत् यत् इयं सन्धिः भारतस्य यूनां, कृषकाणां, मत्स्यपालकानां, एम्. एस्. एम्. ई. इति क्षेत्राणां कृते च विशिष्टरूपेण लाभप्रदा भविष्यति ।

स्वकीये वक्तव्ये, ब्रिटेन-देशस्य प्रधानमन्त्री कीर-स्टार्मरः इत्येषः अवदत् यत्, मुक्तव्यापार-सन्धिः बृहत्तमा आर्थिकदृष्ट्या च महत्वपूर्णा अस्ति । सः प्रधानमन्त्रिणे मोदिने तस्य नेतृत्वस्य व्यावहारिकतायाः च कृते धन्यवादं प्रायच्छत् ।

---------------------------------------------

## लोकसभा-राज्यसभास्थगनम्

विभिन्नविषयेषु विपक्षिदलानां विरोधप्रदर्शनस्य अनन्तरं संसदः द्वयोरेव सदनयोः कार्याचरणं एकस्मै दिवसाय स्थगितं सञ्जातम् । लोकसभा सर्वप्रथमं अपराह्णं द्विवादनं यावत् स्थगिता, अन्ततः भोजनस्यानन्तरं एषा सम्पूर्णदिवसाय स्थगिता जाता । यद्यपि, राज्यसभया कानिचित् सूचीबद्ध-कार्याणि सम्पादितानि , परञ्च विपक्षस्य विरोधकारणेन , सदनस्य कार्याचरणं बाधितम् अभवत्, येन सदनं प्रथमं द्विवादनं यावत् अनन्तरं च सम्पूर्णदिवसाय स्थगितं जातम् ।

---------------------------------------------

## उज्ज्वल-निकमः

राज्यसभायाः मनोनीत-सदस्येन उज्ज्वल-देवराव-निकमः इत्यनेन अद्य सदनस्य सदस्यत्वेन शपथवचनं स्वीकृतम् । विशिष्टरूपेण आकाशवाण्या सह सम्वादं कुर्वता श्रीनिकमवर्येण प्रोक्तं यत् सः संसदि निजकर्तव्यानां प्रभावात्मकरूपेण निर्वहनं करिष्यति ।

---------------------------------------------

## सर्वोच्चन्यायालयः-स्थगनादेशः

सर्वोच्चन्यायालयेन बॉम्बे-उच्चन्यायालयस्य आदेशः स्थगितः, यस्मिन् षडधिकद्विसहस्रतमवर्षे मुम्बै-रेल्-विस्फोटकप्रकरणे अभियुक्तभूताः सर्वे द्वादशजनाः दोषमुक्ताः कृताः आसन्। निर्णयस्यास्य विरोधं कुर्वन् महाराष्ट्र-सर्वकार-पक्षतः उपस्थितः भारतस्य सालिसिटर्-जनरल् तुषार् मेहता इत्येषः, न्यायमूर्तिः एम्. एम्. सुन्द्रेशः , न्यायमूर्तिः एन्. के. सिङ्घ् इत्येतयोः पीठं प्रति अवदत् यत् सः निर्णयानन्तरं कारागारात् मुक्तान् अभियुक्तान् समर्पणार्थं निर्देशं दातुं आदेशं न याचते इति।

---------------------------------------------

**प्रधानमन्त्री-सोनोवालः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् भारतस्य जलपोतस्थानकानि यान्त्रिकीकरणस्य, व्यापारसुगमतायाः च माध्यमेन वैश्विक-वाणिज्य-केन्द्रत्वेन विकसितानि भवन्ति । श्रीमोदिना एतत् वक्तव्यं जलमार्ग-मंत्रिणा सर्बानंद-सोनोवालवर्येण एकस्मै दैनिक-वार्तापत्राय लिखितं लेखं प्रकाशयता कथितम् । वार्तापत्रे एषा वार्ता प्रकाशिता आसीत् यत् कथं जलपोतनिर्मातृ-संस्थानानि भारतीय-निर्मातृभिः सह सहकार्यं कुर्वन्ति सन्ति । अनेन सहकार्येण अधिकाधिकानाम् आजीविकानां निवेशानां च मार्गाणि प्रशस्तानि भवन्ति । स्वकीये लेखे , श्री-सोनोवाल-वर्येण उल्लेखः कृतः अस्ति यत् भारतस्य जलपोतस्थानकानि वाणिज्यस्य आधुनिक-प्रवेश-द्वारं भवितुं लॉजिस्टिक-नोड्स् इति रूपेण पारंपरिक-भूमिकाः उल्लङ्घ्य अग्रे गच्छन्ति । सः प्रोक्तवान् यत् क्षमता-विस्तारेण,यान्त्रिकीकरणेन च सुगमव्यापारे ध्यानं केन्द्रितं कुर्वत् भारतं विशाखापत्तनम्, मुंद्रा, जेएनपीए , कामराजर सदृशानां जलपोतस्थात्राणां वैश्विक-मानकम् उन्नतशिखरं प्रति अनयत् । मंत्रिणा समुद्र-क्षेत्रे स्थिरतायै, पर्यटनावसराय, आर्थिक-विस्ताराय च भारतस्य प्रतिबद्धता अपि प्रकाशिता ।

---------------------------------------------

**रुस-विमान दुर्घटना**

नव-चत्वारिंशत् जनान् वहत् रशियादेशस्य यात्रिकविमानं गुरुवासरे पूर्व-अमूर्-प्रदेशस्य टिण्डा-नगरं निकषा पतितम्। टास् इति स्रोतानुसारं, न्यून-दृश्यतायां अवतरणकाले चालकदलस्य त्रुटिः सम्भाव्यकारणं मन्यते इति। अङ्गारा-एयरलाईन्स् इति संस्थया सञ्चालितं आन्टोनोव्-ए. एन्.-24 इति विमानम् स्वस्थानात् प्रायशः दश-मील-मिते दूरे एव राडार इत्यतः अपागच्छत्। पश्चात् रक्षकाः दूरस्थे वने जाज्वल्यमानानि भग्नावशेषाणि अपश्यन्।

---------------------------------------------

## प्रवर्तन-निदेशालयः-अन्वेषणम्

प्रवर्तन-निदेशालयः अद्य रिलायन्स्-अनिल-अम्बानि-समूहोद्योगं विरुध्य ऋणपूर्तौ अनियमिततया सह धनशोधनविषयञ्चाभिलक्ष्य पञ्चत्रिंशत्स्थलेषु आकस्मिकान्वेषणाय अगच्छत्। अन्वेषणे निरीक्षणीयाः पञ्चाशदधिकाः उद्योगविशेषाः, पञ्चविंशतितः अधिकाश्च जनाः सन्ति। प्रवर्तन-निदेशालयः अवदत् यत् प्रारम्भिकान्वेषणे सप्तदशोत्तरद्विसहस्रतमवर्षतः नवदशोत्तरद्विसहस्रतमवर्षान्तं यावत् नैजिकवित्तकोषेभ्यः प्रायः त्रि-सहस्र-कोटि-रूप्यकाणां ऋणस्य विचलनम् प्रकटितमस्तीति ।

---------------------------------------------

## ऋतु-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन अद्य तटीय-कर्नाटक-ओडिशा-प्रदेशयोः अत्यधिकतोऽधिक-वर्षा भविष्यतीति पूर्वानुमानं कृतमस्ति। अद्य मध्यमहाराष्ट्रे, छत्तीसगढे, पश्चिमबङ्गस्य गाङ्गीयक्षेत्रे मध्यप्रदेशेन सह दक्षिण-द्वीपकल्पीयभारते चापि प्रचण्डतोधिकवृष्टिः भविष्यतीति ऋतु-विज्ञान-विभागेन पूर्वानुमानं कृतम् अस्ति। श्वस्तनं यावत् पूर्वोत्तरभारते, बिहार्- पूर्व-उत्तरप्रदेश-झार्खण्ड- उत्तराखण्ड इत्येतेषु प्रदेशेष्वपि प्रचण्डवृष्टेः सम्भावना वर्तते ।

---------------------------------------------

## बैड्मिण्टन्-चाईना ओपन।

बैडमिण्टन्-क्रीडायां भारतस्य शीर्ष-पुरुषयुगलः सात्विक-साईराज-रङ्किरेड्डी, चिराग-शेट्टी चैतौ अद्य चाईना-देशस्य चाङ्ग्झौ-नगरे चाईना-ओपन्-सूपर्-थाउजन इति प्रतियोगितायाः प्रागुपान्त्य-चक्रं प्रविष्टवन्तौ ।

---------------------------------------------

## क्रिकेट्-क्रीडा

क्रिकेट्-क्रीडायां, भारतं, मैञ्चेस्टर्-नगरे चतुर्थ-निकष-क्रीडायाः द्वितीये दिने इङ्ग्लेण्ड्-देशं विरुध्य प्रथम-पार्यां भोजनावकाशं यावत् षट्क्रीडकानां हानौ एकविंशत्यधिकत्रिशतमिति धावनाङ्कान् व्यरचयत् ।

।।इति वार्ता।।